# मम्मटपण्डितराजसम्मतकाव्यभेदविषयस्य तौलनिकमुपस्थापनम्[330]

*नारायणदत्तमिश्रः*[331]

**तददौषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि** [332] तथा **रमणीयार्थप्रतिपादकः शब्दः काव्यम्** [333] इति क्रमशो वाग्देवतावतारभूतमम्मटाचार्य्यस्य पण्डितराजजगन्नाथस्य च काव्यलक्षणप्रतिपादनभेदपुरःसरमिदं स्पष्टं यदन्येषु विषयेष्वपि विदुषोरनयोः काव्यगतवैचारिकमतप्रकाशनं परस्परं कथञ्चिद् विपरीततया दृष्टिगतम्भविष्यतीति । मम्मटाचार्यविलिखितः काव्यप्रकाशः पण्डितराजजगन्नाथप्रणीतो रसगङ्गाधरश्च रसध्वन्यलङ्कारादिविषयैरलङ्कृतमनोरमभावधातरि साहित्यकाशे देदीप्येते । वस्तुतः काव्यस्य शरीरं शब्दार्थौ उभा इति विवर्णयद्भिर्मूर्धन्यैराचार्यैः काव्यस्य लक्षणं स्वस्वप्रतिभानुसारं प्रतिष्ठापितम् । काव्यमर्मज्ञैर्मम्मटाचार्यैः शब्दार्थयोः समेकितं महत्त्वं स्वव्याकरणवैदुष्येण सह काव्यप्रकाशनामके लक्षणग्रन्थे प्रतिपादितम् । अत्रैव काव्यदिशा कथं शब्दार्थाभ्यामभीष्टवस्तुबोधः सञ्जायत इति विशदरूपेण चर्चितम् । शब्देन ततो वाच्येनार्थेन वा सहृदयचेतःसु बोधायमानानि वस्तूनि विविधप्रसङ्गानुसारं कथं पृथक् पृथक्तया प्रकाशमानानि भवन्तीत्यन्वेषणमुखसिद्धान्तितस्य तथ्यस्य काव्यप्रकाशनामग्रन्थस्य प्रथमोल्लासे काव्यत्रिविधत्वेन स्पष्टीकृतं मम्मटाचार्येण । पण्डितराजजगन्नाथेनापि विषयमिमं स्वीकृत्य शब्दार्थविषयसम्बद्धाः काव्यगतदुरूहविषया विवेचिताः । काव्यस्यापूर्वं लक्षणं विदधताऽनेनालङ्कारिकविद्वद्वरेण्येन पण्डितराजेन स्वाद्वितीयैव पर्यालोचनात्मिका प्रतिभा दर्शिता । अवश्यमेव वाग्देवतावतारभूतो मम्मटः काव्यगतानां विविधानां विषयाणामाश्रयं स्वीकृत्य स्वमेधसो विस्तृतिं काव्यप्रकाशे प्रकाशयति तथापि सर्वत्रैव प्रायश्शोऽनेन विदुषा स्वमतं प्रमापयितुं स्वप्राचीनानां समकालिकानाञ्च कवीनामेव श्लोकाः प्रमाणतयोपस्थापिताः । पण्डितराजजगन्नाथतुलनायां मम्मटाचार्यस्यायं व्यवहारः सम्भवतया कथञ्चिन्न्यूनत्वमेतस्य प्रतिपादयति । यद्यपि चकास्त्येवानेन विविधकालखण्डस्थकविकृतकाव्यानामेकत्रोपस्थापनेन मम्मटाचार्यस्य सङ्ग्रहकारित्वम् । अत्रैव रसगङ्गाधरकृतपक्षे समालोचनद्वारा सर्वं स्पष्टं भवति यद् वस्तुतः कीदृश्या नवनवोन्मेषशालिन्या प्रतिभायाः स्वाम्यासीत् सः पण्डितराजः, येन न केवलं साहित्यसम्बद्धानां गूढातिगूढभावगतानां विषयाणां विवेचनमेव कृतमपितु यत्र कुत्राप्यावश्यकत्वे दृष्टे सति स्वनवीनं मतञ्च दृढतयोपस्थापयितुं सर्वथैव स्वकृतं नवं नवमतिशयाह्लादान्वितं पद्यं सहृदयपुरःसरं प्रकटितम् । रसगङ्गाधरकारोऽयं पण्डितराजजगन्नाथः काव्यप्रकाशकृन्मम्मटापेक्षया बहुपश्चाद्वर्त्ती । तस्मात् स्वाभाविकोऽयं विचारो यन्नवीनैः स्वापूर्वविचारदृग्भिः पुरातनानां सम्मानितानां विद्वद्वरेण्यानामपि मतानुमतं सम्यगालोच्य संशोधनरूपेण पुराकालिकं तत्सर्वं तथ्यं विकास्यत एवेति । एतद्व्यवहारानुसारमेवानेन पण्डितराजजगन्नाथेन काव्यलक्षणादिविषयावकाशेषु पर्यालोचितं संशोधितं स्वनवीनञ्च मतं तथ्यं वा प्रदर्श्य काव्यप्रकाशकृतो मम्मटात् स्वकीयम्मतान्तरम्प्रकटितम् । काव्यलक्षणानुगुणं काव्यहेतुविषयोऽपि द्वयोः काव्यलक्षणकारयोर्विचारानुसारं परस्परं भिन्न एव । यत्र काव्यप्रकाशकारो मम्मटः शक्तिर्निपुणताऽभ्यास [334] इत्येवं त्रितयं समूहं काव्यहेतुमुक्तवान् , तत्रैव रसगङ्गाधरकारेण

[330] "पण्डितराजमहोत्सवरजतजयन्तीसमारोहः" इति नामधेयायां राष्ट्रियसंस्कृतसंस्थानदेववाणीपरिषद्यामायोजितायां द्विदिवसात्मिकायां राष्ट्रियशोधसङ्गोष्ठ्यां शोधपत्रमिदं नवदेहलीस्थराष्ट्रियसंस्कृतसंस्थानपरिसरे 29.10.2012 दिनाङ्के सम्प्रस्तुतम् ।

[331] *शोधच्छात्रः (M.Phil),* विशिष्टसंस्कृताध्ययनकेन्द्रम् , जवाहरलालनेहरूविश्वविद्यालयः

[332] काव्यप्रकाशः, प्रथमोल्लासः, प्रथमं सूत्रम् , पृष्ठम्-१८

[333] रसगङ्गाधरः , प्रथमाननम् , पृष्ठम्-१०

[334] **शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् । काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ॥**

 ISSN 976-8645

प्रतिभामात्रमेव काव्यस्य कारणरूपं स्वीकृतम् । प्रतिभाकारणरूपेऽदृष्टव्युत्पत्त्यभ्यासानामन्तर्भावो भवतीति पण्डितराजजगन्नाथस्य विचारस्तद्यथा – **तस्य च कारणं कविगता केवला प्रतिभा । सा च काव्यघटनानुकूलशब्दार्थोपस्थितिः । तद्गतञ्च प्रतिभात्वं काव्यकारणताऽवच्छेदकतया सिद्धो जातिविशेष उपाधिरूपं वा खण्डम् । तस्याश्च हेतुः क्वचिद् देवतामहापुरुषप्रसादादिजन्यमदृष्टम् , क्वचिच्च विलक्षणव्युत्पत्तिकाव्यकारणाभ्यासौ ।** [335]

न केवलं काव्यहेतुसन्दर्भास्पद एव कश्चन विरोधो मम्मटं जगन्नाथमन्तरा , प्रसङ्गानुसारं काव्यभेदस्वरूपविषयकं तुलनात्मकन्तथ्यमुपस्थापनमनयोर्मतयोरनुसारमिह प्रस्तोष्यमाणे शोधपत्रे क्रमशो विशद्य स्पष्टीक्रियते ।

प्रथमं तावत् काव्यप्रकाशकृता मम्मटाचार्येण विवेचितानि काव्यभेदस्वरूपाण्युदाहरणानां परिशीलनेन सह प्रस्तूयन्ते । तथाहि काव्यभेदसम्बद्धं प्रथमं वचनमिदं वाग्देवतावतारभूतस्य मम्मटस्य – **इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः ।** [336]

वाच्यद्वारा यदाऽतिशयेन व्यङ्ग्यमनुभूयते तदाऽस्य नाम ध्वनिरिति भवति । ध्वनिरयं विषयो विशेषः । तस्माद् विवेचमानेन मम्मटेन स्वमतमेतद्विषयकमेवमुल्लिखितम् –**इदमिति काव्यम् , बुधैर्वैय्याकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः , ततस्तन्मतानुसारिभिरन्यैरपि न्यग्भावितवाच्यव्यञ्जनक्षमस्य शब्दार्थयुगलस्य ।** [337]

वस्तुतो वैयाकरणमतानुसारमर्थसूचकः शब्द एव ध्वनिरिति , यः स्वशब्दरूपिशरीरं विहाय बोधितार्थस्य कस्यचन पृथक् पदार्थस्य प्रकाशनं कारयति । ईदृग्रीत्यैव वैयाकरणप्रतिपादितध्वनिमतानुयायिभिरालङ्कारिकैः साहित्यिकैर्वा तथ्यमिदं मतं यद् यदा वाच्यार्थो द्योतमानेन प्रतीयमानेनार्थेन वा निम्नायते तदा प्रतीयमानार्थस्य प्रतीतौ समर्थः शब्द एव ध्वनिनाम्ना प्रथितो भवति । एवंविधो ध्वनिरेव यदा काव्ये प्रयुज्यते तदानीमेतद् ध्वनिमुखमुत्तमं काव्यं कथ्यत इत्यर्थः । तथाह्युदाहरणं काव्यप्रकाशानुसारमिदम् –

**निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो , नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः ।**

**मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे ,वापीं स्नातुमितो गताऽसि न पुनस्तस्याधमस्यान्तिकम् ॥** [338]

श्लोकार्थोऽयं यद् हे असत्यवादिनि सन्देशवाहिके ! त्वं वस्तुतः वाप्यां स्नातुं गतासीन्न तु तस्य धूर्त्तस्य (नायकस्य) समक्षम् , यतोहि सरोवरे स्नानेनैव तव स्तनतटयोः संलिप्तं चन्दनं पूर्णतया दूरं समाप्तं वा गतं तथा तवाधरस्य

---

(काव्यप्रकाशः , प्रथमोल्लासः , पृष्ठम्- १३)

335 रसगङ्गाधरः , प्रथमाननम् , पृष्ठम्- २७-२९

336 काव्यप्रकाशः , प्रथमोल्लासः , द्वितीयं सूत्रम् , पृष्ठम्- २३

337 काव्यप्रकाशः , प्रथमोल्लासः , पृष्ठम्- २४

338 काव्यप्रकाशः , प्रथमोल्लासः , पृष्ठम्- २६-२७

लालिमाऽपि निर्मृष्टोऽभवदेवमेव तव नेत्रयोः कोणेऽप्यञ्जनेन कज्जलेन वा रहिते प्रत्याभाताम् । स्नानेन च तवेदं कृशं शरीरं किञ्चिच्छैत्येनाथवा प्रफुल्लतया पुलकितमवालोकत ।

वस्तुत ईदृगर्थो वाच्यरूपः परन्तु वक्तुर्बोद्धुश्च प्रसङ्गानुसारमयमेव वाच्यार्थो विवक्षाविशेषेण व्यङ्ग्यार्थे पर्यवर्त्तत । तथाहि नायिकया काचिद् दूती नायकस्य पार्श्वे स्वसन्देशं दापयितुं नियुक्ताऽऽसीत् ,किन्तु सा दूती सौन्दर्यातिशयित्वद्रष्ट्रा विरहव्याकुलेन च नायकेनोपभुक्ता । वस्तुतो नायिकारूपवक्त्राऽधमशब्दस्य प्रयोगेणैवायं व्यङ्ग्यार्थोऽत्यन्तं स्पष्टं भवति । बोद्धा सहृदयश्च वाच्येनार्थेन वस्तुतः किं कथयितु विवक्षाऽस्ति वक्तुरित्यस्य परिपाके व्यङ्ग्येनानेन क्षमौ भवतः । अतो वाच्यार्थतः पृथग् व्यङ्ग्यार्थेन किं वाऽधमशब्दस्य व्यञ्जकत्वेन ' दूति ! त्वं निःसन्देहं मम नायकेन सह रमणात् परमेवात्राऽऽगताऽसि',इत्यस्यार्थस्य प्रतीतिर्व्यञ्जकरूपप्रयुक्ताधमशब्दस्य ध्वनिना जायते । अन्यश्चोदाहरणमेतादृशम्-

**या निशा सर्वभूतानां तस्यां जागर्त्ति संयमी । यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥** [339]

निशापदान्मिथ्यादृष्टेः पराङ्गमुखता तथा जागरणवाचिपदतः सम्यक् तत्त्वदृष्टिं प्रति सदैवोन्मुखताऽऽत्मसात्कर्तव्येति श्लोकेऽस्मिन् श्रीकृष्णोऽर्जुनं व्यञ्जनया बोधयति । तस्मादतिशयिव्यङ्ग्यत्वेन ध्वन्यात्मकमुत्तमकाव्यत्वमत्र विद्यते । एतादृशमेव काव्यमुत्तममुच्यते मम्मटाचार्येण ।

व्याकरणविन्मम्मटाचार्येण काव्यस्य द्वितीयभेदस्वरूपस्य मध्यमकाव्यस्य लक्षणं काव्यप्रकाशे स्वतृतीयसूत्रेणोक्तम् – **अतादृशि गुणीभूतव्यङ्ग्यं तु मध्यमम् ।** [340]

अस्यार्थो यद् व्यङ्ग्यार्थस्य वाच्यार्थापेक्षया गुणीभूतेऽप्रधानत्वे सति वा तादृक् काव्यम् उत्तमश्रेण्यां न भूत्वा मध्यममिति सोपानमधितिष्ठति । समासेन , ध्वनिकाव्यतोऽन्यद् भिन्नं काव्यं यत्र व्यङ्ग्यमप्रधानं चमत्कृतिरहितं भवति तन्मध्यममिति । तद्यथा काव्यप्रकाशस्थमुदाहरणमेतादृशस्य काव्यस्य –

**ग्रामतरुणं तरुण्या नववञ्जुलमञ्जुसनाथकरम् । पश्यन्त्या भवति मुहुर्नितरां मलिनमुखच्छाया ॥** [341]

उदाहरणस्वरूपेणोद्धृतः श्लोकोऽयं मध्यमकाव्यश्रेण्यां कथमिति प्रश्ने सत्येवं कारणस्वरूपं विशद्यते –

प्रतीक्षमाणाया युवत्या मुखकान्तिर्मलिना जायत इति वाच्यार्थोऽत्र प्रधानायते तथा च यूना दत्तसङ्केतानुसारेणापि सा तरुणी नागतेति व्यङ्ग्यार्थो गौणायते । तस्माद् व्यङ्ग्यार्थस्य वाच्यार्थापेक्षया गौणत्वाद् गुणीभूततया मध्यमकाव्यं स्वीक्रियते काव्यधुरन्धुरेण मम्मटाचार्येण ।

मध्यमकाव्यभेदलक्षणं स्वरूपञ्च विवृण्वताऽऽचार्येणाग्रेऽवरमधमं वा नामकं काव्यभेदमेवं निगदितम् – **शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम् ।** [342] इति ।

---

339 श्रीमद्भगवद्गीता (२/६९)

340 काव्यप्रकाशः , प्रथमोल्लासः , तृतीयं सूत्रम् , पृष्ठम्- २

341 तदेव

342 काव्यप्रकाशः , प्रथमोल्लासः , चतुर्थं सूत्रम् , पृष्ठम्-३०

 ISSN 976-8645

वस्तुतस्तु यदा कवीनां गुणालङ्कारप्रदर्शनमेव वर्णनोद्देश्यं भवति तदा तैः काव्यस्य कृते परिगणिता मूलभूता रसरीत्यौचित्यादयो गौणायन्ते । शब्दच्छटामर्थसौन्दर्यातिशयित्वञ्च प्रदर्शयितुं स्वपाण्डित्यप्रयासात्मकोऽयमवरं नाम काव्यभेदः । यत्र व्यङ्ग्यं न स्यादिति न नियमः । अपित्वेतस्मिन् काव्यभेदे स्फुटप्रतीयमानार्थरहितत्वं भवति विद्यमानम् । इह प्रथमं शब्दचित्रात्मकमवरं नाम काव्यभेदोदाहरणमुपस्थाप्यते मम्मटाचार्यविलिखितकाव्यप्रकाशानुसारम् –

**स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटा-मूर्च्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाह्नाय वः ।**

**भिद्यादुद्यदुदारदर्दुरदरी दीर्घादरिद्रद्रुम-द्रोहोद्रेकमहोर्मिमेदुरमदा मन्दाकिनी मन्दताम् ।** [343]

अत्र मन्दाकिनी विषयिणी प्रीतिस्तथाऽन्यतीर्थैर्भागीरथ्याः श्रेष्ठत्वन्तु व्यज्येते तथापि श्लोककारस्य मुख्यं तात्पर्यं नास्त्यस्मिन्नपितु ' अनुप्रासालङ्कारजनितझङ्कृत्यामेव ' । तस्मादेतादृशेषु काव्येषु भवति शब्दचित्रं नामावरकाव्यभेदत्वम् ।

अन्यस्यावरकाव्यरूपात्मकस्य वाच्यचित्रस्य तात्पर्यञ्च शृङ्खलासु बद्धानां भिन्नभिन्नार्थानां पुरस्करणं भवति । तथाहि काव्यप्रकाशकृता पुरस्कृतोऽयमुदाहरणरूपः श्लोकः –

**विनिर्गतं मानदमात्ममन्दिराद् भवत्युपश्रित्य यदृच्छयाऽपि यम् ।**

**ससम्भ्रमेन्द्रद्रुतपातितार्गला निमीलिताक्षीव भियाऽमरावती ॥**[344]

इह हयग्रीवभिया देवेन्द्रस्यामरावती निमीलिताक्षीव प्रतीयत इत्यर्थसत्त्वेऽमरावतीनगर्य्याः स्थितिः काचन नायिकावत् प्रतिभातीति सम्भावनात्मकोऽर्थ उत्प्रेक्षाऽलङ्कारप्रयोगेण वाच्यचित्रं नामावरं काव्यभेदत्वमुपस्थापयतीति । एवं काव्यप्रकाशस्थं काव्यभेदस्वरूपमुदाहरणानुसारं प्रतिपादितम् ।

अथ रसगङ्गाधरकारकृतं नवं काव्यभेदस्वरूपं तद्गतोदाहरणानुगुणमुपस्थाप्यते । मम्मटपरवर्त्तिना जगन्नाथेन काव्यभेदविषयकं वचनमेकत्रैवोपात्तम् – **तच्चोत्तमोत्तममध्यमाधमभेदाच्चतुर्धा** ।[345] इत्यनेन । तत्र प्रथमप्रकारस्योत्तमोत्तमनामाख्यस्य काव्यभेदस्य वपुः स्वकृतेन सूत्रेणैवं स्पष्टयति रसगङ्गाधरकृत् – **शब्दार्थौ यत्र गुणीभावितात्मानौ कमप्यर्थमभिव्यङ्क्तस्तदाद्यम्** । [346] इहोत्तमकाव्यप्रसङ्गे मम्मटाचार्यानुसारमेव रसगङ्गाधरकारस्य विचारः । यत्र हि शब्दार्थौ न्यग्भावितौ भवत इति प्रायःशः सामान्ये लक्षणेऽपि पण्डितराजजगन्नाथानुसारमेतादृशं काव्यं भवत्युत्तमोत्तमं नामकं नोत्तममात्रमिति । स्वरचितोदाहरणप्रस्तुत्योत्तमोत्तमकाव्यस्वरूपं विशदयति पण्डितराजः –

**शयिता सविधेऽप्यनीश्वरा सफलीकर्त्तुमहो मनोरथान् । दयिता दयिताऽननाम्बुजं दरमीलयन्नयना निरीक्षते ॥**[347]

---

343 अत्रैव , पृष्ठम् - ३१

344 काव्यप्रकाशः , प्रथमोल्लासः , पृष्ठम्- ३२

345 रसगङ्गाधरः , प्रथमाननम् , पृष्ठम्- ३७

346 तत्रैव

347 रसगङ्गाधरः , प्रथमाननम् , पृष्ठम्- ३८

 ISSN 976-8645

नात्र नायिकागतलज्जारत्यभीप्सा वा व्यङ्ग्यार्थोऽपितु नायकविषयकनायिकानिष्ठरतिरेव । शब्दा अत्र निम्नायेते तस्मादिहोत्तमोत्तमत्वं नाम काव्यत्वम् । एवमेव पण्डितराजजगन्नाथविरचितस्य भामिनीविलासस्य श्लोकोऽयम् – **तल्पगताऽपि च सुतनुः श्वासाङ्गं न या सेहे। सम्प्रति सा हृदयगतं प्रियपाणिं मन्दमाक्षिपति ॥**[348] अत्रापि हस्तमन्दाक्षेपणेन शब्दार्थौ रतिनामकं स्थायिभावं कथयतस्तस्मादुत्तमोत्तमत्वं नाम काव्यलक्षणानुसार्युदाहरणमिदम्। जगन्नाथानुसारमेतादृशेष्वेवोदाहरणेष्विदमुत्तमोत्तमकाव्यभेदविषयत्वं सहृदयं सद्य एवावश्यमाह्लादयितुमर्हमिति । न तावत् काव्यप्रकाशकृत्कथितेऽप्पयदीक्षितकृतोदाहरण [349] एतादृशमुत्तमोत्तमत्वम् । इह गुणीभूतव्यङ्ग्याक्षेपे विहितेऽस्त्येव कथञ्चिदुत्तमोत्तमत्वमुदाहरणे नोत्तमोत्तमत्वमिति रसगङ्गाधरकारविवृत्तिवचनानुसारम् [350] ।

इदानीं तावद्रसगङ्गाधरकारानुसारमुत्तमकाव्यभेदलक्षणमुदाहरणपुरःसरं प्रदर्श्यते । तद्धि – **यत्र व्यङ्ग्यमप्रधानमेव सच्चमत्कारकारणं तद्द्वितीयम् ।** [351] अर्थाद् यत्र सर्वथाऽप्रधानं चमत्कारकारणं व्यङ्ग्यं तन्मम्मटोक्तं मध्यमं काव्यमेव पण्डितराजजगन्नाथदिशोत्तममिति । अत्रायं विशेषः – यस्मिन् काव्ये वाच्यापेक्षया प्राधान्यं व्यङ्ग्यान्तरापेक्षया च गुणीभावस्तस्मिन्नोत्तमोत्तमत्वं यच्च मम्मटानुसारमुत्तममेव । लक्षणेस्मिन्नेवकारस्योपादानेन पण्डितराजोक्तोत्तमोत्तमत्वमम्मटाचार्यप्रोक्तोत्तमत्वयो परस्परं भिन्नार्थो जातः । पण्डितराजजगन्नाथविवेचितस्यैतादृशस्योत्तमकाव्यस्योदाहरणमिदम् –

**राघवविरहज्वालासन्तापितसह्यशैलशिखरेषु। शिशिरे सुखं शयानाः कपयः कुप्यति पवनतनयाय ॥**[352]

इह वनवासिनः श्रीरामचन्द्रस्य सीताविरहसन्तापविषयकवर्णनानुसारं श्रीरामविरहतापः समाप्तङ्गतो हनुमत्कृद्विशिष्टेन कार्येणेत्यप्रधानव्यङ्ग्यत्वचमत्कारकारणत्वेनोत्तमकाव्याभिधायित्वम् ।

निःशेषच्युतचन्दनमिति मम्मटोक्तं प्रथममुत्तमं काव्यमपि वस्तुतः पण्डितराजकथिते द्वितीय उत्तमकाव्यभेदेऽन्तर्निहितं भवतीति विशेषः ।

---

[348] रसगङ्गाधरः , प्रथमाननम् , पृष्ठम्- ४५

[349] **निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो ,**
**नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः ।**
**मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे ,**
**वापीं स्नातुमितो गताऽसि न पुनस्तस्याधमस्यान्तिकम् ॥** (काव्यप्रकाशः , प्रथमोल्लासः , पृष्ठम्- २६-२७)

[350] तथाहि- अयि बान्धवजनस्याज्ञातपीडागमे ! स्वार्थपरायणे ! स्नानकालातिक्रमभयवशेन नदी-मदीयप्रिययोरन्तिकमगत्वेव , वपीं स्नातुम् , इतो मदन्तिकात् गताऽसि , न पुनस्तस्य परवेदनानभिज्ञतया दुःखदातृत्वेनाधमस्यान्तिकम् । यतो निःशेषच्युतचन्दनं स्तनयोस्तटमेव नोरःस्थलम् , वापीगतबहुलयुवजन-त्रपापारवश्यादसद्वयलग्नाग्र-स्वस्तिकीकृत-भुजलतायुगलेन तटस्यैवोन्नततया मुहुरामर्शात् एवं त्वरया सम्यगक्षालनेनोत्तरोष्ठो न निर्मृष्टरागः , अधरस्तु तदपेक्षया गण्डूषजल-रदनशोधनाङ्गुल्यादीनामधिकसम्मर्दमावहतीति तथ । किञ्च- सम्यगक्षालनेन नेत्रे जलमात्रसंसर्गात् दूरमुपरिभाग एवानञ्जने । शीतवशात् तान्वाच तव तनुः पुलकिता , इति । एवं तस्या विदग्धाया गूढतात्पर्यैवोक्तिरुचिता , अन्यथा वैदग्ध्यभङ्गापत्तेः । एवं साधारणेष्वेषु वाक्यार्थे मुख्यार्थे बाधाऽभावात् तात्पर्य्यार्थस्य झटित्यनाकलनात् कुतोऽत्र लक्षणावकाशः । अनन्तरञ्च वाक्यर्थप्रतिपत्तेर्वक्तृबोद्धनायकादीनां वैशिष्ट्यस्य प्रतीतौ सत्यामधमपदेन स्वप्रवृत्तिप्रयोजको दुःखदातृत्वरूपो दर्मः साधारणात्मा वाच्यार्थदशायापराधानन्तर-निमित्तक-दुःख-दातृत्वरूपेण स्थितो व्यञ्जनाव्यापारेण दूतीसम्भोगनिमित्तक-दुःखदातृत्वाकारेण पर्यवस्यतीत्यालङ्कारिकसिद्धान्तनिष्कर्षः । (रसगङ्गाधरस्थवचनम्)

[351] रसगङ्गाधरः , प्रथमाननम् , पृष्ठम्- ६६

[352] रसगङ्गाधरः , प्रथमाननम् , पृष्ठम्- ६९

इतोऽनन्तरं पण्डितराजानुसारं तृतीयं मध्यममित्यस्य काव्यभेदलक्षणं प्रदर्श्यते – **यत्र व्यङ्ग्यचमत्कारासमानाधिकरणो वाच्यचमत्कारस्तृतीयम् ।** [353] एतल्लक्षणानुसारं वाच्यव्यङ्ग्ययोरनयोश्चमत्कारः समानाधिकरणे यत्र न भवत्यर्थाद् व्यङ्ग्यचमत्कारस्याल्पत्वमपि यदा वाच्यचमत्कृतिसमक्षमन्तलीनतां प्रति गच्छति तत्रैव मध्यमं नाम काव्यत्वम् । यथा यमुनावर्णननामकस्य पण्डितराजकृतिविशेषस्येदं वाक्यम् – **तनयमैननाकगवेषणलम्बीकृतजलधिजठरप्रविष्टहिमगिरिभुजायमानाया भगवत्या भागीरथ्याः सखी ,** [354] गङ्गायाः पातालचुम्बनमिति व्यङ्ग्यचमत्करो वाच्यान्तर्गतोत्प्रेक्षाचमत्कारस्य तुलनायां न्यक्कृतः । अतो मध्यमं नाम काव्यं पण्डितराजजगन्नाथदिशम् । मम्मटोक्तमवरकाव्यान्तर्निहितं वाच्यचित्रं वस्तुतो जगन्नाथानुसारं मध्यमकाव्यभेदश्रेण्यां तदैव परिगणितं भविष्यति यदा तत्र व्यङ्ग्यस्याल्पत्वमुपस्थितं भवति । ममटोक्तसङ्गृहीतोऽवरकाव्यस्थोऽयं श्लोकोऽपि मध्यमं काव्यं वीरभावव्यङ्ग्यस्य न्यग्भवनेन । स च मेण्ठप्रणीतहयग्रीववधस्य श्लोकः – **विनिर्गतं मानदमात्ममन्दिराद् भवत्युपश्रुत्य यदृच्छयाऽपि यम् ।**

**ससम्भ्रमेन्द्रद्रुतपातितार्गला निमीलिताक्षीव भियाऽमरावती ॥** [355] इति ।

ततश्चतुर्थप्रकारकं काव्यभेदलक्षणं रसगङ्गाधरानुसारं विविच्यते । एतादृशस्य काव्यभेदस्य लक्षणं हि – **यत्रार्थचमत्कृत्युपस्कृता शब्दचमत्कृतिः प्रधानं , तदधमं चतुर्थम् ।** [356] इति । अस्यार्थो यद् यत्र वाच्यचमत्कृतिपरिपोषणाधारः शब्दचमत्कार एव प्राधान्यं भजते तत्राधमं नाम काव्यभेदः स्वीक्रियत इति । वस्तुतस्तु मम्मटाचार्येणावरनामके तृतीयभेदात्मके काव्य एव शब्दचित्रस्यान्तर्भावः कृतः परन्तु रसगङ्गाधरकारेण पण्डितराजजगन्नाथेन शब्दचमत्कृतेर्वाच्यचित्रचमत्कृतितुलनायामप्राधान्यं द्योतनाय चतुर्थं काव्यभेदसोपानं काव्यघटकरमणीयभावानुसारं निदर्शितम् । तथाहि – **मित्रात्रिपुत्रनेत्राय त्रयीशात्रवशत्रवे । गोत्रारिगोत्रजत्राय गोत्रात्रे ते नमो नमः ॥** [357]

एवंविधा एव स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटे'त्येतादृशाः श्लोकाः पण्डितराजोक्तचतुर्थकाव्यभेदे परिगणयितुमर्हा इत्यर्थः । काव्यप्रकाशरसगङ्गाधरयोः प्रतिपादितः काव्यभेदविषयोऽयमेवं त्रिषु वाक्येषु तोलयितुमुपस्थापयितुं वा शक्यः । प्रथमं वाक्यं तावद् यन्मम्मटस्योत्तमं नाम काव्यं तज्जगन्नाथस्योत्तमोत्तमं नाम काव्यम् । द्वितीयं तावदेतस्य मम्मटाचार्यस्य यन्मध्यमं तदेवैतस्य पण्डितराजस्योत्तमं नाम काव्यम् । तृतीयवाक्यानुसारं यद्वाग्देवताऽवतारभूतस्य मम्मटाचार्यस्यावरं नाम काव्यं तदेव पण्डितराजजगन्नाथमते मध्यमाधमे काव्य इति । अनेनोपक्रमेण मम्मटाचार्यपण्डितराजजगन्नाथमतानुसारं काव्यभेदविषयात्मकं विवेचनमेतत्प्रणीतकाव्यप्रकाशरसगङ्गाधरनामकयोः प्रथितयोः ग्रन्थविशेषयोस्तुलनया विहितमिति ।

## सन्दर्भान्विता अनुशीलिताश्च ग्रन्थाः

[353] रसगङ्गाधरः , प्रथमाननम् , पृष्ठम्- ७६

[354] अत्रैव

[355] काव्यप्रकाशः , प्रथमोल्लासः , पृष्ठम्-३२

[356] रसगङ्गाधरः , प्रथमाननम् , पृष्ठम्- ७८

[357] रसगङ्गाधरः , प्रथमाननम् , पृष्ठम्- ७९

- मम्मटाचार्यविरचितः शास्त्रिश्रीनिवाससम्पादितः काव्यप्रकाशः , प्रकाशनम् - मेरठ : साहित्यभण्डार सुभाष बाजार भण्डार , चतुर्दशसंस्करणम्-१९६० तमे ख्रीष्टाब्दे ।
- मम्मटाचार्यविरचितः काव्यप्रकाशः बालबोधिनीटीकाविभूषितः , प्रकाशनम् - पुणे : भाण्डारकर इन्स्टीच्यूट मुद्रणालय , सप्तमसंस्करणम्-१९६५ तमे ख्रीष्टाब्दे ।
- पण्डितराजजगन्नाथविरचितो रसगङ्गाधरः प्रथमाननान्तः चन्द्रिकासंस्कृतहिन्दीव्याख्योपेतः , प्रकाशनम् - वाराणसी:चौखम्बा विद्याभवन , पुनर्मुद्रितं संस्करणम्-२००८ तमे ख्रीष्टाब्दे ।
- पण्डितराजजगन्नाथविरचितो रसगङ्गाधरः सरलाटीकासमन्वितः , प्रकाशनम् - मुम्बई : निर्णयसागरमुद्रणालयम् , षष्ठसंस्करणम्-१९४७ तमे ख्रीष्टाब्दे ।
- पण्डितराजजगन्नाथविरचितो रसगङ्गाधरः रसचन्द्रिकाव्याख्यायुतः प्रथमो भागः , प्रकाशनम् – वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः , प्रथमसंस्करणम्-१९७७ तमे ख्रीष्टाब्दे ।
- कविराजविश्वनाथरचितः साहित्यदर्पणः , सविमर्शशशिकलाहिन्दीव्याख्योपेतः , प्रकाशनम् – वाराणसी : चौखम्बा विद्याभवन ।
- आनन्दवर्धनाचार्यप्रणीतो दुर्गाप्रसादकाशीनाथपाण्डुरङ्गपरबसम्पादितो ध्वन्यालोकः , लोचनव्याख्यासमोपेतः , प्रकाशनम्- दिल्ली : मुन्शी राममनोहरलाल पब्लिशर्स , पुनर्मुद्रितं संस्करणम्-१९८३ तमे ख्रीष्टाब्दे ।